# संस्कृतवार्ताः

दिनाङ्क :- 19.08.2026 सायम् - 06:20

## आदौ मुख्यवार्ताः

- केन्द्रीय-मन्त्रिमण्डलेन एकचत्त्वारिंशदधिक-त्रयोदशसहस्रकोटिरुप्यकाणां पञ्च-परियोजनाः अनुमोदिताः,यत्र चतस्रः रेल-परियोजनाः एका राजमार्ग-परियोजना वर्तते।
- केन्द्रीय-मन्त्री अश्विनी-वैष्णवः असूचयत् यत् सर्वकारेण प्रतिवर्षं प्रायः त्रिंशदधिकैकशत-अर्बुद-अमेरिकी-डॉलरमितं सार्वजनिक-निवेशः क्रियते येन सततार्थिक-विकासः संवृत्यते।
- सर्वोच्च-न्यायालयः नीट-यूजी-प्रश्नपत्र-गोप्यताभङ्ग-प्रकरणात् परं परीक्षा-परिष्कारे राधाकृष्णन्-समित्याः संस्तुतीनां क्रियान्वयनाय केन्द्र-सर्वकारस्य प्रतिवचनम् ऐच्छत् ।
- कोलम्बिया-देशे भीषण-भूकम्पेन मृतानां सङ्ख्या द्वादशाधिक-त्रिशतं यावत् प्रवृद्धा।
- भारतेन प्रथम-निकष-स्पर्धायां श्रीलङ्कादलं पञ्चषष्ट्यधिकैकशतं धावनाङ्कैः पराजितम् ।

---

## केन्द्रीय-परियोजनाः

प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां समुपविष्टेन केन्द्रीय-मन्त्रिमण्डलेन अद्य एकचत्त्वारिंशदधिक-त्रयोदशसहस्रकोटिरुप्यकाणां पञ्च-प्रमुख-परियोजनानाम् अनुमोदनं कृतम्।

एतासु चतस्रः रेल-परियोजनाः एका च राजमार्ग-परियोजना समाविष्टा अस्ति। नवदिल्ल्यां मन्त्रिमण्डल-उपवेशनानन्तरं प्रसार-माध्यमान् सम्बोधयन् केन्द्रीय-सूचना-प्रसारणमन्त्री अश्विनी-वैष्णवः असूचयत् यत् रेल-विभागस्य चतस्रः बहुमार्ग-परियोजनाः पश्चिमवङ्ग-ओडिशा-तमिळनाडु-आन्ध्रप्रदेश-राज्यानाम् अष्ट-जनपदान् समावेक्ष्यन्ति। एतासु खड़गपुर-भद्रक-चतुर्थ-रेलमार्गः, भद्रक-हरिदासपुर-चतुर्थ-रेलमार्गः, गुम्मिडिपुण्डि-गूडूर-तृतीय-चतुर्थ-रेलमार्गः, सहैव कटक-पारादीप-तृतीय-चतुर्थ-रेलमार्ग-परियोजनाः समाविष्टाः सन्ति।

अनेन भारतीय-रेलमार्ग-सञ्जाले प्रायः दशाधिक-चतुश्शत- किलोमीटर-परिमितस्य नूतन-मार्गस्य योगः भविष्यति।

मन्त्रिणा स्पष्टीकृतं यत् पञ्चाशदधिक-चतुश्शतोत्तर-नवसहस्रकोटि रूप्यकाणां व्ययेन युक्ताः एताः रेल-परियोजनाः द्विसहस्रतमस्य त्रिंशत्, एकत्रिंशत्-वर्ष-पर्यन्तं सम्पूर्णाः भविष्यन्ति। श्रीवैष्णवः अवदत् यत् मार्ग-क्षमतायाः वृद्ध्या यातायात-गतिशीलतायां महान् परिष्कारः भविष्यति, येन भारतीय-रेलवे-सञ्चालन-दक्षता सहैव सेवा-विश्वसनीयता सुदृढा संवर्तिष्यते। एताभिः परियोजनाभिः प्रायः अष्टचत्त्वारिंशदधिक-चतुश्शतोत्तर-षट्सहस्रग्रामाणां सम्पर्क-व्यवस्था सुगमा भविष्यति।

---

<u>उत्तरप्रदेश-जापानसम्मेलनम्</u>

केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः प्रतिपादितवान् यत् भारतस्य आर्थिक-विकासः सम्प्रति वैश्विक-स्तरे मान्यतां प्राप्नोति सहैव देशः षट्-प्रतिशतात् अष्ट-प्रतिशतं यावत् तीव्र-गत्या संवर्धते। सः अवदत् यत् विकासस्य अयं उपक्रमः चतुर्षु प्रमुख-स्तम्भेषु आधारितो वर्तते। अद्य नवदिल्ल्यां षड्विंशत्यधिक-द्विसहस्रतमस्य उत्तर-प्रदेश-जापान-निवेश-शिखर-सम्मेलनम् सम्बोधयन् श्रीवैष्णवः असूचयत् यत् निवेशः देशस्य विकास-यात्रायाः महत्वपूर्णः भागः वर्तते, यत्र भारतं प्रतिवर्षं प्रायः त्रिंशदधिकैकशत-अर्बुद-अमेरिकी-डॉलरमितं धनं निवेशयति। मन्त्रिणा स्पष्टीकृतं यत् वर्धित-आर्थिक-गतिविधिभिः देशः सततं विकासं रक्षितुं, नूतन-उद्योगावसरान् स्रष्टुं,अथ च विकासस्य लाभान् समाजस्य प्रत्येकं वर्गं यावत् प्रापयितुं सफलो जातः। अत्रावसरे उत्तर-प्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः प्रतिपादितवान् यत् भारत-जापानयोः सहभागिता विकासे, प्रौद्योगिक्यां, समृद्धौ च आधारिता विद्यते। सः प्रोक्तवान् यत् उत्तर-प्रदेशः सम्प्रति भारतस्य शीर्ष-त्रिषु अर्थव्यवस्थासु अन्यतमरूपेण उद्भूतः सहैव देशस्य समग्र-विकासस्य चालकश्च संवृत्तः।

---

<u>राष्ट्रपति-अधिकारिणः</u>

राष्ट्रपतिपदासीना द्रौपदी मुर्मः प्रावोचत् यत् प्रौद्योगिक्याः, प्रसारमाध्यमस्य, अर्थनीतेः अथ च लोकनीति-क्षेत्राणां स्थितिः तीव्र-गत्या परिवर्तते। सा एतत् तदा प्रतिपादितवती यदा भारतीय-सूचना-सेवायाः भारतीय-सांख्यिकी-सेवायाश्च प्रशिक्षु-अधिकारिणः नवदिल्ल्यां राष्ट्रपति-भवने तया सह शिष्टाचार-मेलनं अकुर्वन्। अवसरेऽस्मिन् राष्ट्रपतिः अधिकारिभ्यः परामृष्टवती

यत् ते स्व-निर्णयेषु विवेकशीलाः, व्यवहारे करुणापराः, सत्यनिष्ठाश्च भवेयुः। राष्ट्रपतिना एतदपि प्रतिपादितं यत् तेभ्यः प्रदत्तः अधिकारः निष्पक्षतया, विनयेन, समर्पणेन च जनतायाः सेवायै एकं महत्तरम् उत्तरदायित्वं धारयति।

---------------------------------------------------------------

**उच्चन्यायालय - यूजी**

सर्वोच्च-न्यायालयेन अद्य प्रतिपादितं यत् भविष्ये प्रश्नपत्र-गोप्यताभङ्ग-निवारणाय राष्ट्रिय-परीक्षा-संस्थायाः संस्थागतकरणम् अतीव अनिवार्यं वर्तते। न्यायालयस्य अनुसारम् अस्याः कृते सुरक्षिता आधारभूत-संरचना, समर्पितानि परीक्षा-केन्द्राणि, सुदृढा साइबर-सुरक्षा-प्रणाली, संस्थागत-दक्षता, अथ च परीक्षा-सञ्चालनाय एका स्थायिव्यवस्था आवश्यकी वर्तते। नीट-यूजी-विंशति-षड्विंशतिः प्रश्नपत्र-प्रकटन-प्रसङ्गे याचिकानां श्रवणं कुर्वन् उच्चन्यायालयेन केन्द्रीय-शिक्षा-मन्त्रालयस्य सचिवः आदिष्टः यत् सः राधाकृष्णन्-समित्याः संस्तुतीनां क्रियान्वयनाय स्वीक्रियमाणानां चरणानां विवरण-सहितम् एकं शपथपत्रम् न्यायालये प्रस्तुयादिति।

---------------------------------------------------------------

**प्रवर्तन-निदेशालयः**

प्रवर्तन-निदेशालयेन दशसु स्थानेषु अन्वेषणं कृतम्। मौलाना-मोहम्मद्-अली-जौहर-परिसरेण रामपुरस्थेन मोहम्मद्-अली-जौहर-विश्वविद्यालयेन च सम्बद्धे धनशोधन-प्रकरणे उत्तरप्रदेशे, दिल्ली-नगरे, रामपुरे, सहारनपुरे च विभिन्नेषु स्थानेषु प्रवर्तन-निदेशालयेन सहसान्वेषणं प्रवर्तितम्। प्रवर्तन-निदेशालयेन ज्ञापितं यत् धनशोधन-निवारण-अधिनियमस्य, द्व्यधिक-द्विसहस्रतमे वर्षे प्रवर्तितस्य अधिनियमस्य अन्तर्गतं अन्वेषणं कृतम् इति। इदं अन्वेषणं स्वायत्त-

करदातृभिः माध्यमैः सर्वकारीय-अनुबन्ध-निधेः कथित-विचलनस्य, ततः प्राप्तस्य धनस्य विश्वविद्यालयस्य अथवा परिसरस्य कृते सम्पत्तिनिर्माणे कथित-उपयोगस्य च विषये प्रवर्तते। लखनऊ-नगरे स्थितः मौलाना-मोहम्मद्-अली-जौहर्-परिसरः, यस्य मुख्य-न्यासीरूपेण उत्तरप्रदेशस्य पूर्व-मन्त्रिमण्डलीय-मन्त्री आज़म्-खान इत्येषः परिवारस्य सदस्यैः सह कार्यं निर्वहति, रामपुर-मण्डले मोहम्मद्-अली-जौहर्-विश्वविद्यालयं सार्वजनिक-विद्यालयं च प्रचालयति। प्रवर्तन-निदेशालयेन विज्ञापितं यत् अन्वेषणस्य प्रमुखम् उद्देश्यम् अपराधजनित-धनस्य उद्घाटनं, वित्तीय-अभिलेखानां अथ प्रलेखानां सङ्ग्रहणं, सर्वकारीय-निधेः उपयोगेन सम्बद्धानां डिजिटल्-साक्ष्याणां प्राप्तिश्च अस्ति।

---

<u>कोलम्बिया- भूकम्पः</u>

कोलम्बिया-देशे चत्वारि दशांशोत्तर सप्त मितायां तीव्रतायां भूकम्पेन मृतकानां सङ्ख्या द्वादशाधिक त्रिशतं यावत् वर्धिता, प्रायः एकादशोत्तर षट्शताधिकचतुःसहस्रं यावत् जनाः व्रणिताः, यस्मिन् नवत्यधिकद्विशतं यावत् जनाः अद्यापि लुप्ताः सन्ति इति सूच्यते। राष्ट्रिय-आपद्-सङ्कट-प्रबन्धन-विभागः अवदत् यत् प्रायः सप्तसप्तत्यधिक द्विशतं यावत् भवनानि पतितानि, प्रायः त्रिंशत्सहस्रं यावत् गृहाणि क्षतिग्रस्तानि। राष्ट्रिय-अन्ताराष्ट्रिय-अन्वेषण-उद्धार-दलानि भग्नावशेषस्य अधः अद्यापि निबद्धान् लुप्तान् वा जनान् अन्वेष्टुं कार्येषु निमग्नानि सन्ति। कोलम्बिया-देशस्य राष्ट्रपतिना एबेलार्डो डे ला एस्प्रीला इत्यनेन आर्थिक-आपत्कालस्य घोषणा कृता, येन सर्वकारः साहाय्यस्य, पुनर्वसनस्य, पुनर्निर्माणस्य च प्रयत्नानां गतिं वर्धयितुं असाधारण-उपायान् कर्तुं समर्थः भविष्यति।

---

<u>पुरुष-क्रिकेट्</u>

पुरुष-क्रिकेट्-क्रीडायाम् अद्य गॉल-नगरे द्वयोः निकष-श्रृङ्खलायाः प्रथमायां निकष-क्रीडायां आतिथेय-श्रीलङ्कादलं भारतेन पञ्चषष्ठ्यधिकैकशत-धवनाङ्कैः पराजितम्। इदानीं भारतं श्रृङ्खलायां एकं-शून्यं अङ्केन अग्रे अस्ति।

।। इति वार्ता: ।।